संस्कृतवार्ता:

18.09.2024

सायम् - 06:20

मुख्यवार्ता:

· जम्मूकश्मीरे विधानसभा निर्वाचनस्य प्रथमचरणाय सप्त जनपदानां चतुर्विंशति आसनेभ्य: मतदानमद्य शान्तिपूर्णरीत्या सम्पन्नम्। सायं पञ्चवादनं यावत् अष्टपञ्चाशत् दशमलव-एकं नव प्रतिशतं मतदानं समनुष्ठितम्।

· अद्य केन्द्रीयप्रशासनेन एकं राष्ट्रम् एकं निर्वाचनमिति विषयमभिलक्ष्य निर्मिताया: उच्चस्तरीयाया: समित्या: अनुशंसा: स्वीकृता:।

· केन्द्रप्रशासनेन देशस्य विज्ञान-प्रौद्योगिक क्षेत्रयो: संवर्धनाय चन्द्रयानस्य चतुर्थाभियानाय वीनसआर्बिटर-इत्यस्मै अभियानायापि स्वीकृति: प्रदत्ता।

· भारतीय-ऋतुविज्ञान-विभागेन अद्य मध्यप्रदेश-उत्तरप्रदेश,राजस्थानसहित ऐशान्यभारते च अत्यधिक वर्षाया: सम्भावना प्रकटिताऽस्ति।

· भारतीय-बैडमिंटन-क्रीडिकया मालविका-बसोड इत्यनया अद्य चाइना-ओपन-बैडमिंटन-क्रीडास्पर्धायां महिला-एकल-वर्गस्य प्रथमे चक्रे ग्रेगोरिया-तुनजुंग इत्येषा पराजिता।

जम्मूकश्मीरविधानसभा

जम्मूकश्मीर विधानसभा निर्वाचनस्य प्रथमचरणीयं सप्त जनपदानां चतुर्विंशति आसनेभ्य: मतदानमद्य शान्तिपूर्णरीत्या सम्पन्नम्। सायं पञ्चवादनं यावत् अष्टपञ्चाशत् दशमलव-एकं नव प्रतिशतं मतदानं समनुष्ठितम्।

मन्त्रिमण्डलस्य निर्णय: (एकं राष्ट्रम एकं निर्वाचनम्)

अद्य केन्द्रीयप्रशासनेन एकं राष्ट्रम् एकं निर्वाचनमिति विषयमभिलक्ष्य निर्मिताया: उच्चस्तरीयाया: समित्या: अनुशंसा: स्वीकृता:। नवदिल्यां वार्ताहरान् सम्बोधयन् सूचनाप्रसारणमन्त्री अश्विनी वैष्णव: उक्तवान् यत् प्राक्तन-राष्ट्रपते: रामनाथकोविन्दस्य

आध्यक्ष्ये गठितया उच्चस्तरीयया समित्या विभिन्नानां दलानां प्रतिनिधय: हितधारका: विषयविज्ञाश्च परामृष्टा:। अनया अनुशंसितमस्ति यत् लोकसभाविधान-सभयो: निर्वाचनम् एक सहैव भविष्यन्ति, पंचायत-नगरनिगमानाञ्च निर्वाचनानि सामान्यनिर्वाचनानां शतदिवसेषु एव भवेयुरिति।

मन्त्रिणा प्रोक्तं यत् प्रशासनेन देशस्य विज्ञान-प्रौद्योगिक क्षेत्रयो: संवर्धनाय चन्द्रयानस्य चतुर्थाभियानाय वीनसआर्बिटर-इत्यस्मै अभियानायापि स्वीकृति: प्रदत्ता।

राष्ट्रपति: द्रौपदीमुर्मु:

राष्ट्रपति: द्रौपदीमुर्मु: प्रोक्तवती यत् अनुसन्धान-विकासक्षेत्रयोः महिलानाम् अधिकतया सहभागित्वम् न केवलं देशस्य सांस्कृतिक -आर्थिकोन्नतये महत्वपूर्णम् वर्तते , अपितु महिलानां जीवनस्य गुणवत्तायां परिष्कारम् आनेतुमपि आवश्यकमस्ति । राष्ट्रपतिः अद्य जयपुरस्य मालवीय राष्ट्रीय प्रौद्योगिकीय संस्थाने आयोजितम् अष्टादशतमं दीक्षांतसमारोहं संबोधयन्ती आसीत् । अनया प्रोदिरितं यत् यदि महिलाभ्यः समानावसराः प्रदास्यन्ते तावत् ताभिः उत्कृष्टता प्राप्तुं शक्यते ।राष्ट्रपति: अग्रे प्राकटयत् यत् विद्यार्थिनां महत्वाकांक्षा: राष्ट्रानुरूपं भवेदिति ,अपि च तेषां कृते समाज - राष्ट्रयोः विकासस्य मार्गप्रशस्तिकरणं भवेत् । राष्ट्रपतिना अत्रावसरे विद्यार्थिभ्यः स्वर्णपदकमपि प्रदत्तम् संस्थानस्य च नवस्य अरावली छात्रावासस्य आभासीयमाध्यमेन उद्घाटनं विहितम् ।

दिल्ल्याः न्यायालय:

दिल्ल्याः एकेन न्यायालयेन पूर्व -रेलमन्त्रिणे लालूप्रसादाय , तस्य च पुत्राय बिहारस्य पूर्व उपमुख्यमन्त्रिणे तेजस्वीयादवाय तथा च अन्येभ्यः सम्बध्द् जनेभ्यः भूमेः प्रतिदाने वृत्तिदानात्मकप्रवञ्चनासम्बद्धे धनशोधन प्रकरणे आदेशः प्रख्यापितः । दिल्ल्याः राउज एवन्यू न्यायालयेन अनने अस्मिन् प्रकरणे लालूप्रसादस्य पुत्राय तेज प्रताप यादवायापि अयं आदेशः संप्रेषित: ।विशिष्ट न्यायाधीश: विशाल गोगने इत्ययं आरोपिभ्यः आगामिनः मासस्य सप्तमे

दिनाङ्के न्यायालयं प्रत्यागन्तुं निर्देश: प्रदत्त; ।आरोपिणः विरुध्य प्रदत्त-पूरकारोपपत्रस्य संज्ञानानान्तरं न्यायालयेन आदेशोयं प्रदत्तः ।

## हरियाणा-निर्वाचनम्

हरियाणा-विधानसभायै जायमानेभ्य: एकचरणीयनिर्वाचनेभ्य: प्रचाराभियानं सजवं प्रवर्तते। विभिन्न-राजनीतिकदलीय-नेतार: नैर्वाचनिकसभा: कुर्वन्त: सन्ति। आहत्य एकत्रिंशदधिकैकसहस्र-प्रत्याशिन: नैर्वाचनिकसमराङ्गणे स्वकीयं भाग्यं परीक्षन्त: सन्ति। सोमवासरं यावत् नामप्रत्यावनं करणीयमासीत्। अक्टूबर-मासस्य पञ्चमे दिनाङ्के मतदानं अष्टमे दिनाङ्के च मतगणना भविष्यति।

## कांग्रेस-घोषणा-पत्रम्

कांग्रेसदलप्रमुख: मल्लिकार्जुन-खडगे इत्येष: अद्य हरियाणा-निर्वाचनम् अभिलक्ष्य कांग्रेसदलस्य घोषणापत्रम् लोकार्पितवान्। नवदिल्ल्या: दलमुख्यालये घोषणापत्रं समुद्घाटयन् श्रीखडगे अवोचत् यत् राज्ये दलस्य प्रशासननिर्माणानन्तरं एता: सप्तघोषणा: प्रपूरयिष्यन्ते। येषु प्रमुखा: सन्ति त्रिंशत्-यूनिटात्मक-परिमाणे प्रत्येकस्मै कृषकपरिवाराय नि:शुल्कं विद्युतदानेन सह अन्नानां न्यूनतम-समर्थनमूल्यस्य दानमपि अस्ति।

## ऋतुविज्ञान-विभाग:

भारतीय-ऋतुविज्ञान-विभागेन अद्य मध्यप्रदेश-उत्तरप्रदेश,राजस्थान समेत्य ऐशान्यभारते च अत्यधिक वर्षाया: सम्भावना प्रकटिताऽस्ति। हरियाणा-चण्डीगढ-नागालैण्ड-मणिपुर-मिजोरम-त्रिपुरा-अण्डमाननिकोबार-द्वीपसमूहानाम् कतिपय-स्थानेषु धारासार-वर्षाया: सम्भाव्यताऽस्ति।

## उपराष्ट्रपति:

उपराष्ट्रपतिना जगदीपधनखडेन पर्यावरण-रक्षणमभिलक्ष्य सामूहिक-प्रयासानाम् समाह्वानं कृतम्। स: अद्य गान्धीनगरे वैश्विक-नवीकरणीय-ऊर्जा-सम्मेलनस्य

समापनसत्रं सम्बोधयन्नासीत्। श्रीधनखडेन प्रोक्तं यत् भारतदेश: सततं विकासशीलोऽस्ति, राष्ट्रे निम्नस्तरेष्वपि परिवर्तनानि जायमानानि च सन्तीति।

भूपेन्द्रयादव:

केन्द्रीय-पर्यावरण-जलवायु परिवर्तन-वन-मन्त्री भूपेन्द्रयादव: अद्य उक्तवान् यत् स्थायिसमाजाय सतत-विकासं प्रति गमनस्य अयम् उचितसमयो वर्तते। गांधीनगरे अद्य पुन:निवेश-सम्मेलने एकस्मिन् भारतं प्रति मार्ग: इत्याख्ये विषये एकं सत्रं सम्बोधयन् मन्त्री सतत-आर्थिकविकासं प्राप्तुं कार्बनोत्सर्जनस्य अल्पतायै बलं प्रदत्तवान्।

के.म.शि.संघ:

केन्द्रीय-माध्यमिक-शिक्षा-मण्डले सी.बी.एस.ई. इत्यस्मिन् आगामिवर्षाय केन्द्रीय-परीक्षायां भागगृहीतॄणां नवमैकादशकक्षयो: छात्राणां पञ्जीकरणकार्यम् अद्यारब्धम् ।मण्डलस्य सूचनानुसारि पञ्जीकरणस्य अन्तिमा तिथि: अक्टूबरमासस्य षोडशदिनाङ्क: भविष्यति।

विश्वखाद्यभारतम्

चतुर्दिवसीय: वर्ल्डफूडइण्डिया इति विश्वखाद्यभारतमिति उत्सव: श्व: आरभ्य नवदिल्ल्याम् आरप्स्यते। खाद्य-प्रसंस्करण-उद्योगमन्त्रालयेन ख्यापितं यत् एतस्मिन् चतुर्दिवसीयकार्यक्रमे नवति: देशा: षड्विंशति: च राज्यानि केन्द्रशासितप्रदेशा: अष्टादश केन्द्रीयमन्त्रालया: च भागं ग्रहीष्यन्ति। जापानदेश: सहभागिदेशो भविष्यति तथा च वियतनाम-ईरानदेशौ प्रमुखौ भविष्यत:। कार्यक्रमावधौ खाद्यप्रसंस्करण-क्षेत्रे नवाचारस्य प्रौद्योगिक्या: स्थिरतायाश्च प्रमुखाभिसरणं भविष्यति।

माण्डविया-नड्डा:

युवविषयक-क्रीडामन्त्री डॉ. मनसुखमाण्डविया: उक्तवान् यत् प्रशासनं मूलस्तरे क्रीडा - विषयगतप्रतिभाया: अन्वेषणक्रमे प्रशिक्षण-मूलभूत-संरचना प्रदानाय च प्रतिबद्धं वर्तते। एतत् समग्रदृष्टिकोणं सुनिश्चितं करिष्यति यत् पृष्ठभूमिं क्षमतां च विना प्रत्येकं क्रीडक: उत्कृष्टतां प्राप्तुं शक्नोति। अपि च देशस्य सफलतायां योगदानं प्रदातुं शक्नोति। श्रीमाण्डविया: नवदिल्ल्याम् आयोजिते एकस्मिन् प्रशिक्षणकार्यक्रमे वदन् आसीत्।

## कर्णाटक-इसरोइति

विक्रमसाराभाई-अन्तरिक्ष-केन्द्रस्य निदेशक: डॉ. एस. उन्नीकृष्णन नायर: सूचितवान् यत् इसरो इति गगनयानकार्यक्रमस्यान्तर्गतं मानवरहित-अभियानाय सज्जितम् अस्ति। अद्य बेङ्गलुरुनगरे अष्टमस्य बेंगलुरु-स्पेस-एक्सपो इत्याख्ये कार्यक्रमावसरे वार्ताहरान् सम्बोधयन् डॉ. नायर: अवदत् यत् अस्मै मानवरहिताभियानाय आर्बिटल-इति प्रारूपं निर्मीयते, शीघ्रमेव च श्रीहरिकोटां प्रति प्रेषयिष्यते। अभियानमिदं वर्षान्ते निर्धारितमस्ति।

## मैक्सिको-मारिता:

मैक्सिको देशस्य सिनालोआ राज्ये दुरापादितायां हिंसायां न्यूनातिन्यूना: त्रिंशज्जना: हता:। तत्रत्येन रक्षामन्त्रिणा प्रोक्तं यत् प्रशासनं क्षेत्रेऽस्मिन् सुरक्षाव्यवस्थां सुदृढीकरणे हिंसाया:दमने च प्रयासरतमस्तीति। सैनिकद्वयस्यापि निहनस्य वार्ताऽस्ति। सुरक्षाविभागै: सन्देहास्पदा: त्रिंशदधिकजना: निगडिता: सन्ति। हिंसाया: कारणेषु मादकपदार्थानां क्रय-विक्रयात्मक-गतिविधय: प्रामुख्येन परिलक्षन्त: सन्तीति वार्ताऽस्ति।

## क्रीडावातासु-बैडमिंटनस्पर्धा

भारतीय-बैडमिंटन-क्रीडिकया मालविका-बसोड इत्यनया अद्य चीनदेशस्य चांगझू-नगरे क्रीड्यमानायां चाइना-ओपन-बैडमिंटन-क्रीडास्पर्धायां महिला-एकल-वर्गस्य प्रथमे चक्रे पेरिस-ओलम्पिक-क्रीडाया: कांस्यपदकविजेत्री ग्रेगोरिया-तुनजुंग इत्येषा पराजिता। मालविकया श्रेष्ठताक्रमे सप्तमस्थानधात्री इण्डोनेशिया-देशवास्तव्या क्रीडिका षड्विंशति:चतुर्विंशति:एकविंशति:-एकोनविंशति: अङ्कान्तरालेन पराजिता।

।। इति वार्ता:।।